संस्कृत

ग्रं.नं. २४७

स्तोत्र

रामचंद्रस्य वेदपादामिद्
स्तोत्र

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

७१८/स्तो.१५९

(1)

श्रीरामचंद्राय नमः ॥ श्रीमद्रामं रघूत्तंसं सच्चिदानंदलक्षणं ॥ भवंतं
करुणार्णवं नंगायेत्वा नमसा गिरा ॥ १ ॥ रामेंद्वर्वादलश्यामे जानकीक
नकोज्ज्वला ॥ भातिमे देवतामेघे विद्युल्लेखेव भास्वरा ॥ २ ॥ त्वदन्य
न्नभजे राम निकामान्यभजंतु तान् ॥ भक्तेभ्यो ये पुरा देवा आयुः
कीर्तिं प्रजां ददुः ॥ ३ ॥ भजनं पूजनं रामं करिष्यामि तवानिशं ॥
श्रियं नेच्छामि संसाराद्भयं विंदामि नामिह ॥ ४ ॥ राम रामे निरामे
निर्द्वंद्वं निर्विकल्पं भवान् ॥ यमदूतास्तु कालं त्वत्संगे रिवधावतु ॥
५ ॥ स्वच्छंदचारिणं दीनं रामरामाभिवादिनं ॥ तायन्मामनुनिम्लन
पथा वैरिव धावतु ॥ ६ ॥ राम त्वं हृदये येषां स्फुरं वलक्ष्यं वनेपि
ते ॥ मंडनं नवनीतं च क्षीरं सर्पिर्मधूदकं ॥ ७ ॥ प्रार्थयेत्वां रघूत्तं
सम्माभूत्मम कदाचन ॥ संध्यस्तीर्थेषु सर्वत्र पापेभ्यश्च प्रतिग्र

(2)

हः॥ ८॥ श्रीरामजानकीजाने भुवने भवने वने ॥ रघवंशकुलजाता
नोमस्माकमपि नाथ भव ॥ ९ ॥ सर्वेमदर्थं कुरुतोपकारं श्रीराम
माकर्णयकर्णनित्यं ॥ मूर्धनमालोकयने भुजिह्वे स्तुहि श्रुतं गर्त
सहं युवानं ॥ १० ॥ भवानेर घनंसतु दैवतं मे यं सच्चिदानंद घ
नस्वरूपं ॥ एकं परंब्रह्म वदंति नित्यं वेदांतविज्ञानसुनिश्चिता
र्थाः ॥ ११ ॥ भवत्कृपापांगविलोकितेन वैकुंठवासः क्रियते
जनेन ॥ शातो भवंतं शरणागतोस्मि यस्मात्परन्नापरमस्ति किं
चित् ॥ १२ ॥ दीनाभवद्भक्तकुले प्रसन्ना भवत्पदाराधनही
नचित्तान् ॥ अनाथबंधो करुणैकसिंधो पितेव पुत्रान्प्रणितो
क्षपस्व ॥ १३ ॥ भवाभवव्याघ्रभयाद्विभीतं जराभिभूतं सह
लक्ष्मणेन ॥ स दैवमां रक्षतु राघवेशः पश्चात्पुरस्तादधरा

(2A)

दुरत्ययान्॥१४॥कामाद्यपथ्येनविवर्धमानंरोगंमहीयंभवना
मधेयं॥इरीकत्वंपदहंत्रिलोक्यांभिषक्तमंत्वाभिषजांश्रणो
मि॥१५॥श्रीरामचंद्रःसजयत्यजस्रंलंकापुरिंज्ञेणगिरोपयोधौ
॥यस्यप्रसादादभयंधनूमानणोरणीयान्महतोमहीयान्॥१६
सीतापतेरामरघूत्तमेतियेनाममालिज्ज त्वेयकधितस्तेतरक्षणात्
॥हिशोज्झवंत्येवयुयुत्सवोप्यलंभियंदधानात्हृदयेषुशत्रवः॥
१७॥अनादिमव्यक्तमनंतमाद्यंपरंस्वयंज्योतिषमप्रमेयं॥वि
लोकयेदाशरथेकदात्वामादित्यवर्णंतमसःपरस्तात्॥१८॥
श्रीराघवस्त्वीयपदारविंदसेवांभवान्नःसततंददातु॥वयंस्व
जन्मांतरसंचितानियपापानिविश्वादुरितानरेम॥१९॥भोचित्त
चेत्कामयसेविभूतिंतमेवसंप्रार्थयवीरमेकं॥रघूत्तमःश्रीरम

(3)

णः सहायः श्रीणां सुहारो धरुणो रयीणां ॥ २० ॥ यं देरविंदेक्षण
मंबुदाभमाकर्णनेत्रा रूकुमारगात्रा ॥ यं जानकी हर्षवनी वने
ध्विप्रियं सखायं परिषस्वजाना ॥ २१ ॥ सीता ज्ञाने नेव जानेत्व
दन्यं स्यरूश्रीरस्ली पुत्रमायुः केदाहं ॥ त्वां स्मत्वांते देवयानाधि
रूढस्तत्वायामि ब्रह्मणावंदमानः ॥ २२ ॥ अहं भरद्वाजमुनि
र्निरंतरं श्रीराममेकं जगदेकनायकं ॥ तं वर्णये मुक्तिरसादिवि
तंहं कविं कवीनामुपमश्रवस्तमं ॥ २३ ॥ पठंति स्तुतिं ये नराके
ध्विकामास्समृध्धिं श्रिया युष्यमायुष्यकामाः ॥ लभंते त्र निःसंशयं
यं पुत्रकामान्लभंतेह पुत्रान्लभंतेह पुत्रान् ॥ २४ ॥ वेदपादाभिदं
स्तोत्रं स्नात्वाभक्त्या सकृन्नरः ॥ यः पठेद्राघवस्याग्रे जीवानिश
रदः शतं ॥ २५ ॥ इति श्री भरद्वाजऋषिप्रोक्तं रामचंद्रस्य वेदपादा
भिदं स्तोत्रं संपूर्णम् ॥ ॥ श्रीरामचंद्रार्पणमस्तु ॥ ॥ छ ॥ ॥

२

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com